न च विधेर्विधिनैक्यवाक्यभावो भवति, वचनव्यक्तिभेदात्। स्तुतिस्तु सा, इत्थं नाम सत्राणि आसितव्यानि, यत् कृतकृत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्या" इति भा०। ब्रह्मविद्यायान्तु सर्वेषां देवादीनामधिकार इति "तदुपर्य्यपि बादरायणः सम्भवात्" इति शा०सूत्रेण व्यवस्थापितं, व्याख्यातञ्चैतत् शाङ्कराचार्य्येण यथा "बाढं मनुष्यानधिकरोतु शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मविज्ञाने नियमोऽस्ति तेषां मनुष्याणामुपरिष्टात् ये देवादयस्तानप्यधिकरोति शास्त्रमिति बादरायण आचार्य्यो मन्यते कस्मात्? सम्भवात्। सम्भवति हि तेषामप्यर्थित्वाद्यधिकारकारणम्। तत्रार्थित्वं तावत् मोक्षविषयं देवादीनामपि, सम्भवति विकारविषयविभूत्यनित्यतालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां सम्भवति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्। नच तेषां कश्चित् प्रतिषेधोऽस्ति। नचोपनयनादिशास्त्रेणैषामधिकारो निवर्त्त्येत उपनयनस्य वेदाध्ययनार्थत्वात् तेषाञ्च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्य्यादि दर्शयति "एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमुवास" "भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो! ब्रह्मेत्यादि"। यदपि कर्मस्वनधिकारकारणमुक्तम्, न देवानां, देवतान्तराभावात्। न ऋषीणामार्षेयान्तराभावादिति। न तद्विद्यास्वस्ति न हीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चित् कृत्यमस्ति न च भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्य्येत? इति"। ततश्च विद्वत्त्व कर्मफलार्थित्व—तत्तत्कर्मकरणसमर्थत्वापर्य्युदस्तत्वानि अधिकारप्रयोजकानीति सिद्धम् तत्रापि विधानेन सर्वकर्मत्यागरूपे सन्न्यासे विप्रस्यैवाधिकार इति सर्ववादिसम्मतम् द्विजमात्राणामधिकार इति केषाञ्चिन्मतम्। अधिकमाकरे दृश्यम्। कचिच्चाधिकृतस्याधिकारः। यथा दर्शाद्यधिकृतस्य प्रयाजादिष्वधिकारः "प्रधानाधिकारो अङ्गाधिकारो भवतीति" न्यायात्। "ताम्बूलाधिकारो दत्त इति" हितो०। "हृताधिकारां मलिनामिति" स्मृतिः। कर्मणि घञ्। "कर्त्तव्ये "स्वाधिकारे प्रमत्त" इति मेघ०। प्रकरणे, व्याकरणशास्त्रे पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवर्त्तने। "अधिकारोऽयम् आ पञ्चमाध्यायसमाप्तेरिति" सि०कौ०। तत्राधिकारश्च प्रत्ययादिकर्म्माद्यर्थमुत्तरोत्तरसूत्रेषु पूर्व्वसूत्रोपात्तशब्दस्यानुवर्त्तनम्। यथा "प्रत्ययः, परश्च" इति सूत्रोपात्तप्रत्ययपरशब्दयोः आ पञ्चमाध्यायसमाप्तेः सर्व्वत्र सूत्रेषु अनुवर्त्तनम्। स चाधिकारः त्रिविधः "सिंहावलोकितं चैव मण्डूकप्लुतमेव च। गङ्गाप्रवाहवच्चापि अधिकारस्त्रिधा मत" इत्युक्तभेदत्रयात्। तदुदाहरणन्तु व्याकरणेऽवगमय्यम्। नियोज्यतया विषयीकरणे, "सर्व्वाधिकारं शास्त्रमिति" जै०सू०। तदभिप्रायेण "बाढं मनुष्यानधिकरोतु शास्त्र"मिति मनुष्याधिकारत्वाच्छास्त्रस्येति" च शा०भा०। सर्वमधिकरोति कर्म्मण्युपपदे अण् एवमेव मनुष्याधिकारत्वादित्यत्रापि

**अधिकारविधि** पु० अधिकारे फलस्वाम्ये विधिर्विधानम्। मीमांसकोक्ते विधिभेदे कर्मजन्यफलभोक्तृताज्ञापके विधौ यथा स्वर्गकामो यजेत इत्यनेन यागजन्यफलभोक्ता स्वर्गकामीति ज्ञाप्यते। तत्र नियोज्यप्रवर्त्तनाविधिः अधिकारः यथा "राजा राजसूयेन यजेतेति" तत्र राजसूये राज्ञ एव नियोज्यतया तत्र प्रवर्त्तनात्तस्य तथात्वम् स्वस्वकर्मणि नियोगे च।

**अधिकारिता** स्त्री अधिकारिणो भावः तल्। विद्वत्त्वफलार्थित्वकर्म्मकरणशक्तिमत्त्वापर्य्युदस्तत्वप्रयोज्ये अधिकारे "भार्य्यापुत्रविहीनस्य—नास्ति यज्ञेऽधिकारितेति" स्मृतिः। भावार्थे त्व। अधिकारित्वम् अत्रैवार्थे न०।

**अधिकारिन्** त्रि० अधिकरोति अधि+कृ—णिनि। स्वामिनि विहितकर्मफलभोक्तरि, शास्त्रेण कर्त्तव्यतोपदेशेन नियोजिते, कामनाविषयफल-तदुपायोपदेशेन प्रवर्त्तिते च स्त्रियां ङीप्। वेदान्तमतसिद्धे अनुबन्धचतुष्टयमध्ये अनुबन्धभेदे वेदान्तसारे वेदान्तशास्त्रालोचनहेतुभूतानुबन्धचतुष्टयनिरूपणाय "अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थः इह जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाते"त्युक्तम्। स चाधिकारी उत्तममध्यमाधमभेदेन त्रिविधः "अधिकारित्रैविध्यान्न नियम" इति "अधिकारिभेदान्न नियम" इति च सांख्यसूत्राभ्यां तथोक्तेः। तत्र उत्तमाधिकारिणः विधानेन विहितसर्वकर्मत्यागपूर्व्वकं निराकारब्रह्मज्ञानेऽधिकारः, मध्यमाधिकारिणः विहितवर्णाश्रमादि कर्म्म करणपूर्व्वकं सोपाधिब्रह्मोपासने, अधमस्य तु वर्णाश्रमविहितकर्म्म विधानपूर्व्वकं साकारब्रह्मोपा-